ध्यंविद्वेषरांक्षोभकरंतदेतत् ॥ १२ ॥ एतत्समाराध्यजपेत्सहस्रंलब्ध्वानिशायांरिपुके

श्मशाने ॥ पुनर्जपेद्देवमथोहि षंतमन्योन्ययुद्धंमरणंप्रयाति ॥ १३ ॥ दशाहमेवंप्रजपे

द्विपूर्णांकुलक्षयायप्रलयायमंत्री ॥ ततस्तथाशत्रुकुलोद्भवानांभवेद्यमाख्यानगरी

प्रसन्ना ॥ १४ ॥ पंचास्त्रमालिख्यतदग्रशूलेमध्येतुवृत्तेपवनेचकोणे ॥ मायापदंरौंत्रिं

क्षि रत्नाग्रसाध्यं तारौ ततो च्चाटनयंत्रमेतत् ॥१५॥ संपूज्य जप्त्वा विधिवत्सहस्रं खनेत् श्मशा
ने रिपुगेहकोष्ठे ॥ शत्रुः सबंधुः सगणः सवर्गः प्रयाति दूरे शांतरमाशु गेहात् ॥१६॥ भवेद्धि
नाशं गृहमध्यगानां भूत्वा हि चेष्टां बहुशो भवंति ॥ स्वप्ने भयैरित्क्रूरगणोत्स्वरां च पाता
ल वृष्टिः पतनं च पश्चात् ॥१७॥ त्रिकोणं विलिखेत्पूर्वं पंचकोणं ततः परं ॥ वसुकोणं
ततः पश्चाद्दशकोणं बहिस्ततः ॥१८॥ भूकोणत्रितयं बाह्ये लिखेद्यंत्रं महोज्ज्वलं ॥ तार
साध्यं त्रिकोणांतर्वह्निबीजेन योजयेत् ॥१९॥ पंचारेषु टकारांतं विलिखेत्साध्यमा
रुतं ॥ बहिरष्टसु कोणेषु साध्यं चिंतामणिं लिखेत् ॥२०॥ ततः षड्दशकोणेषु हिंदी

शत्साध्यसंयुतं ॥ चतुष्कोणोरेव हन्त्रं मारयेति पृथक्‌ पृथक्‌ ॥ २१ ॥ लोहे संलिख्यतत्कुस
पुष्पैराणाभ्यर्च्य पूजयेत्‌ ॥ अष्टोत्तरसहस्रं तु स्पष्टाङ्गस्नाजितेन्द्रियः ॥ २२ ॥ पर्वमारभ्यप
र्वांते निशायां दक्षिणां दिशि ॥ दक्षिणाभिमुखो मंत्री खनित्वा बलिपूर्वकं ॥ २३ ॥
पुनस्नान जपेन्मंत्रंमष्टोत्तरसहस्रकं ॥ ततपश्चाद्दिपवः सर्पेप्रयांतपव्याजमारणो
२४ ॥ अथवा साध्यवृक्षस्य समिन्मधुघृतैर्हुतं ॥ तिलसर्षपसंयुक्तं कुर्याद्धोमं य
थाविधि ॥ २५ ॥ क्रमवर्णोज्वलत्केशां शूलहस्तां कपालिनीं ॥ खड्गचर्मधरां बाणा
धनुर्हस्तां महाभुजां ॥ २६ ॥ अग्नीज्वालामयीं दुर्गां संभाअशरभक्षयं ॥ मंत्रांते सा

साध्यमारोप्यमारयेत्तिहुनेत्थिवे॥ २७॥ सप्ताहान्मरणं यांति सत्रूनैवसंशयः॥ स्वर्गभूतलपातालवासिनो मर्त्यमार्यकाः॥ २८॥ शूलिनीरशोनादेवमरणं यांति निश्चयं एतदेव महाबीजं स्मरणात्पापनाशनम्॥ २९॥ जपतः सर्वसिद्धिः स्यात् भूयो भूयो युगे युगे॥ संभावनात् क्रियासिद्धिः पूजनाद्दर्शनं भवेत्॥ ३०॥ नास्तिकाय कृतघ्नाय नाभक्ताय कदाचन॥ विरायकुलेहीनाय न देयं चंडिकामनुं॥ ३१॥ त्रिपंचकोष्ठे विलिख्य शूलिनी ससाध्यनामांकितमध्यबीजं॥ रेखाशिरः कल्पितशूलयुक्तं यंत्रं महाभूतपिशाचहारि॥ ३२॥ त्रयोदशाग्रहेन थेदिनकरत्रिशूलांकितेन वा

गृहोल्लसच्छुभमूलवर्गाङ्गयोः॥ चतुर्ग्रहस्मर्गेरोथाशिखिसमन्विता ----

---------- ३३॥ इतिश्रीआकाशभैरवकल्पे शूलिनीविधिर्नामएकत्रिंशो

ध्यायः॥ ३१ अथ ध्यानं॥ दामृगेंद्रं सजलजलधरश्यामलांहस्तपद्मैः शूलंवाणांक

पाणान्वरिजिलजगरा चापपाशान्वहंतीं॥ चंद्रां चूडांत्रिनेत्रां चतस्रभिरसिना

खेटकं विभ्रतीभिः॥ कन्याभिः सेव्यमानां प्रतिभटभयदां शूलिनीभावयामि॥ १॥

एवंध्यात्वा॥ जपेन्मंत्रंविलोमेनरिपुनामविमिश्रितं॥ अष्टोत्तरसतामेवभ

वेद्वैरिपराजितः॥ २॥ आलिख्यशांतत्रितपावृतांतर्वंहिः शिरोधस्त्रिशिखंद

स्लाहै ॥ स्वकीयकार्यैचिंतवाचकांते दुर्गेतितमूद्भ्यतुमात्रशत्रोः ॥ ३ ॥ द्वारेथवारेगि
कलेवरेवानपेल्लभेरीष्टपलार्थसिद्धिः ॥ भूतामयध्नंचद्विपाद्यधुष्याघ्वराव
ग्मचरंचनूनं ॥ ४ ॥ स्त्रंकारंवेरमूलंजितरिपुवहुलंश्यामलंवीरभद्रं ॥ फट्कारंव्यो

मकेशंधरणिधरणिनिनदंखड्गखेटाग्रहस्तं ॥ हुंकारंभीमनादंद्रुतवहनयनोर
ग्धमानाखिलांशं ॥ फट्कारंवज्रदंष्ट्रंप्रणरिपुजनप्राणसंहारमीडे ॥ ५ ॥ स्त्रंस्त्रं
विद्वेषहननायवीरभद्रायखड्गहंह्रींदक्षध्वंसनायह्रांह्रांररररहुंफट्स्वाहा ॥ ७
मंमंत्रमहावीर्यंवीरभद्रंमहोज्वलं ॥ सहस्रंप्रजपेच्छत्रुपानिग्रहेनुग्रहेतथा ॥ ८

मूलमंत्रावशानेतु ब्रह्माद्याष्टमातृकां ॥ दिक्पालांश्चग्निमंमायांमत्तभुंभनि
शुंभकं ॥७॥ महिषंधर्मसिंहंचवीरेसंक्षेत्रपालकं ॥ विघ्नेश्वरंचवटुंचकालस्कंदं
पृथक्पृथक् ॥८॥ स्वस्वबीजेनमंत्रेणायोजयित्वासाध्यकं ॥ सहस्रंप्रजपेन्मंत्रीत
त्काम्यार्थसिद्धये ॥९॥ शतवारंजपेन्नित्यंपंचाशद्वर्णपूर्वकं ॥ सर्वसिद्धिंसमाप्नो
त्ससमंत्रीसुखमेधते ॥१०॥ भानुमालोयन्मंत्रीभानुबीजयुतंमनुं ॥ भानुवारेज
पेत्सद्योभानुवद्भातिभूतले ॥११॥ ठंवंव्रं — चजंसंचयोजयित्वाथपूर्ववत् ॥ भानु
मालोकयन्मंत्रीप्रजपेत्सोमवासरे ॥१२॥ निविध्याग्निलतापुष्पफलपूर्णामुखा

दयः॥ तद्धातुदर्शनादेव सफलं जायते कुवं॥१३॥ विशेषदिव शेभानुं येनवीजेन योजयेत्॥ तत्सीद्धिलभतेतस्यसंशयोनास्तितत्वतः॥१४॥ इत्याकाशभैरवकल्पे॰ वीरभद्रकल्पे नाम द्वात्रिंशोध्यायः॥३२॥ जगत्क्षोभणप्रयोगः॥ श्रीशिव उवाच॥ अथ भ्रणु कथयामः॥ प्रार्थ्यमानं मुनीन्द्रैरधिगतरिपुलोकानावृतानाध्वतात्वान् हरिविधिमुखवीरान् मेयान स ध्यानपिविमुमतयोधातयत्करोतिद्रुतंतत्॥१॥ जगत्क्षोभणमंत्रस्य ऋषितत्पुरुषेश्वरः॥ तथातिजगतिं छंद्रोदेवताशरभेश्वरः॥२॥ खंबीजं फट्ततः शक्तिर्विनियोगस्तुनियंहे॥ स्वामित्यादिषडंगंस्यान्मूलन्यासंसमा

चरेत ॥ ३ ॥ ध्यात्वरूपेन्महामंत्रं सहस्रं सर्वसिद्धये ॥ दुर्वारपापमंमहोग्रंस्फुरच्चलदध
रंसूर्यचंद्राग्निनेत्रंचक्रंवज्रंत्रिशूलंशरमुसलगदाशक्तिभीतीर्वहंतं ॥ शंखंखेटं
कपालंसधनुहलपरिघोदरानानिहंसौः ॥ सिंहारिंसानुवेशंनमतरिपुजन
प्राणसंहारदक्षं ॥ ४ ॥ ॐ नमोभगवतेदिव्यशरीरायपंचमुखभंजनायप्रणता
र्तिविनाशनायउग्रायउग्रदंष्ट्रायउरगमणिभूषणायउरंउकोलाहलायसर्वलो
कप्रियायसकलभूतनिवारणायशांतधृतिकपालमालालंकृतायशार्दूलचर्मव
सनायशरभसानुवायसूर्यसोमाग्निलोचनायदुर्निवारणनिवारणायदुर्वार

मै॰ ८१

81

क्लीं

लश्यामलायहरितहरायॐ श्रीं ह्रीं श्रीं सर्वभूतानाकर्षयाकर्षयसर्वग्रहाणपाकर्षया

कर्षयभ्रांह.वं भूतग्रहपिशाचग्रहयक्षग्रहराक्षसग्रहस:र्पग्रहदर्पग्रहायस्मार

ग्रहभीमग्रहब्रह्मराक्षसग्रहवेतालग्रहकौमारग्रहपातालग्रहखेचरग्रहभूचरग्र

हकूष्मांडग्रहज्वालास्यग्रहतामसग्रहतमोहांग्रहस्त्रीग्रहपापग्रहपापविक्रमग्र

हकालग्रहनिशाचरग्रह अहोरात्रग्रह सर्वरात्रग्रहपक्षग्रह मासग्रह मंडलग्रह

त्रिमासग्रह षण्मासग्रह वत्सरग्रहान्‌ भोगग्रहान्‌ सारग्रहाभि चारग्रहाभि अ

क्तकग्रह जीवग्रह दावग्रहवातग्रह पातग्रह ज्वरग्रह रोगग्रह,चेतनग्रहस्फोटक

ग्रह दंशग्रह वांतिग्रह भ्रांतिग्रह हिक्कारग्रह संघातिकग्रह संनिपातिकग्रह शो
षणग्रह अविद्याग्रह विज्ञानग्रह लौकिकग्रह वैदिकग्रह रणग्रह एडग्रह की
टग्रह शात्विकग्रह सार्वत्रिकग्रहान् पावेशयावेशय प्रवेशय श्रीव्रंप्रवेशय २
क्षोभय २ कंपय २ सकलशैलं चालय २ सकलशालं घातय २ सकलदिशां
शोधय २ सकलपृथ्वीं भ्रंशय २ सकलदोषान्नाशय २ सकलसेनां ध्वंसय २ श्रीँ
ह्रीँ क्लीँ हूँ मोहय २ भ्रामय २ भाषय २ सर्वभूतग्रहं भाक्षय २ सर्वपिशाचग्रहं
भाषय २ सर्वयक्षग्रहं भाषय २ सर्वराक्षसग्रहं भाषय २ सर्वसर्पग्रहं भाषय २

सर्वदर्पग्रहं भाषय २ सर्वोपस्मारग्रहं भाषय २ सर्वब्रह्मराक्षसग्रहं भाषय २
सर्ववेतालग्रहं भाषय २ कौमारग्रहं भाषय २ सर्वपातालग्रहं भाषय २ सर्व
खेचरग्रहं भाषय २ सर्वभूचरग्रहं भाषय २ सर्वकुष्मांडग्रहं भाषय २ सर्वज्वा
लास्यग्रहं भाषय २ सर्वतामसग्रहं भाषय २ सर्वतमोहारग्रहं भाषय २ सर्वस्त्री
ग्रहं भाषय २ सर्वपर्वतग्रहं भाषय २ सर्वपापग्रहं भाषय २ सर्वपापविक्रमग्रहं
भाषय २ सर्वबालग्रहं भाषय २ सर्वचातुर्थ्यग्रहं भाषय २ सर्वमिथ्याग्रहं भाषय २
सर्वपिशाचग्रहं भाषय २ सर्वचटिकाग्रहं भाषय २ सर्वयामग्रहं भाषय २ सर्वदि

वाचरग्रहंभाषय २ सर्वनिशाचरग्रहंभाषय २ सर्वाहोरात्रग्रहंभाषय २ सर्वस

प्तरात्रग्रहंभाषय २ सर्वपक्षग्रहंभाषय २ सर्वमासग्रहंभाषय २ सर्वानुभो

गग्रहंभाषय २ सर्वानुसारग्रहंभाषय २ सर्वाभिचारग्रहंभाषय २ सर्वमासग्र

हंभाषय २ सर्वमंडलग्रहंभाषय २ सर्वद्विमासग्रहंभाष २ सर्वत्रिमासग्रहंभा

सग्रहंभाषय २ सर्वषण्मासग्रहंभाषय २ संवत्सरग्रहंभाषय २ सर्वाभियुक्त

ग्रहंभाषय २ सर्वेज्जीवग्रहंभाषय २ सर्वदाषग्रहंभाषय २ सर्ववातग्रहंभाषय २

सर्वपोषकग्रहंभाषय २ सर्वज्वरग्रहंभाषय २ सर्वरोगग्रहंभाषय २ सर्वचेतन

ग्रहंभाषय २ सर्वाचेतनग्रहंभाषय२ सर्वस्फोटग्रहंभाषय २ सर्वदंशग्रहंभाष
य २ सर्ववांतिग्रहंभाषय २ सर्वभ्रांतिग्रहंभाषय २ सर्वहिक्काग्रहंभाषय २
सर्वशोषणग्रहंभाषणं २ सर्वधिक्काग्रहंभाषय २ सर्वसंघातग्रहंभाषय २
सर्वसांनिपातग्रहंभाषय २ सर्वपोषणाग्रहंभाषय २ सर्वविद्याग्रहंभाषय २
सर्वविज्ञानग्रहंभाषय २ सर्वलौकिकग्रहंभाषय २ सर्ववैदिकग्रहंभाषय २
सर्वग्रहंभाषय २ सर्वराज्ञग्रहंभाषय २ सर्वविज्ञानग्रहंभाषय २ सर्वलौकिक
ग्रहंभाषय २ सर्ववैदिकग्रहंभाषय २ सर्वग्रहंभाषय २ सर्वराज्ञग्रहंभाषय २

सर्वकीटग्रहंभाषय २ सर्वमोटग्रहं २ सर्वसात्विकग्रहंभाषय २ सर्वसार्वत्रि
कग्रहंभाषय २ ॐआँह्रींह्रौंबंधय २ खंखंहंधय २ ताडय २ पाटय २ क्रोश
य २ कुर्दय २ रोदय २ खादय २ स्त्रौंहौंग्रंधय २ भद्रकालीदुर्गाकलितपक्ष
ह्वयापतिद्वयरिग्लौंत्रांस्तंभय २ त्रौंक्रौंत्रोटय २ रंरंहूंफ्रांदाहय २ ज्रंह्रीं ठंवंज्रं
संपालय २ सर्वसंहारकारणाग्रमानुवपक्षिराजाय चंडवातातिवेगाय प्रेंश्रीं
यंपेसंक्रामय २ खंवंहंधय २ ताडय २ पाटय २ क्रोशय कुर्दय २ रोदय २
खादय २ स्रौंह्रौंग्रंधय २ भद्रकालीदुर्गाकलितपक्षह्वयाय प्रंखंखंहंश्रौंउच्चा

२य २ हूं परमंत्रभेदनाय जहय २ स्फोटय २ घ्रैं परमंत्रप्रमोदनाय छिंदय २ ररर
मैं परतंत्रविछेदनाय भिंदय २ ठंठं छें परविद्याविध्वंसनाय कालानलभैरवाय
त्रितोदरोऽत्तसस्थलाय नाशय नाशय २ सर्वग्रहनाशय २ सर्वभूतग्रहंनाशय
२ सर्वपिशाचग्रहंनाशय २ सर्वशात्विग्रहंनाशय २ घ्रैं परमंत्रयंत्रभेदनाय ८
व्याधिकालोहृदुद्वयापसर्वशत्रून्मारय २ भक्षय २ ह्रीं हूं फट् श्रीं क्लीं ह्रीं शरणा
गतवत्सलाय सामगानप्रियाय शंकरायचंद्रशेखराय अ पर्वरापारपराय अ
प्रमेतोद्रापराणाय क्लीं श्रीं ह्रीं संतानसिद्धिप्रदाय श्रीं संतानसिद्धिप्रदाय श्रीं क्लीं श्रीं

सर्वसंपत्समृद्धिदाय ज्रंरं सर्वसंमोहनाय सर्वमायांमोचय २ ऐं ऐं सोः कालाय भाषां

ज्ञापय २ ल्रृं ल्रृं सर्वरोगहराय रूपं जनय २ विज्ञानंदाय २ हं हं वामदेवाय आत्मा

नंदर्शय २ ॐ खं श्रीं ह्रीं क्लीं ममि वृद्धिं देहि मे स्वाहा ॥ आलेख्य वृत्त बहिरष्ट श

लं मध्ये च मायां त्रिशिखांतराले साध्यावृतं सर्वजयोपयोगं संक्षोभणं चक्रमघो

घमेतत् ॥ ५ ॥ एतन्मंत्रं महावीर्यं सर्वलोकेषु दुर्लभं ॥ यस्य स्मरणमात्रेण तरसा वि

जयी भवेत् ॥ ६ ॥ य इमं प्रजपेद्भक्त्या नानाख्यं तत्र विद्यते ॥ मंत्राणां राजराजोयं तस्मा

त्वं जप सर्वदा ॥ ७ ॥ शत्रुमृत्युपरावांछन्नसततं मंत्रवित्तमः सकृद्दापयत्सहं कुर्याज्ज

पेदेकाग्रमानसः ॥ ८ ॥ जपेषीमनसास्मृत्वावैरिणांनामपूर्वकं ॥ तस्यानाभिमुखोमंत्रीरा
त्रावष्टादशंजपेत् ॥ ९ ॥ देवतानांपमीनांचमानिनांचनरांणांतथा ॥ यदसाध्यंयुगे
सर्वेसर्वरोगेवरानने ॥ १० ॥ मंत्रिणांज्ञातरोषाणांमानिनांस्थानवासिनां ॥ तत्सर्वंसह
सामंत्रस्मरणात्साध्यमाप्नुयात् ॥ ११ ॥ योजपेन्मनसासोहमितियावत्पदेपदे ॥ सर्वे
लोकास्त्वकंपंते किंपुनः शत्रुभाविनां ॥ १२ ॥ किंमंत्रबहुनोक्तेनवक्ष्याम्यर्चिंपयातत
थं ॥ मंत्रस्मरणमात्रेणाशरणेशोभवेद्ध्रुवं ॥ १३ ॥ इत्याकाशभैरवकल्पे॰ जगत्क्षोभ
णमालामंत्रंनामत्रयस्त्रिंशोध्यायः ॥ ३३ ॥ अथभैरवप्रयोगः ॥ अथवक्ष्यम

हामंत्रं भैरवं लोकभैरवं॥ किमत्र बहुनोक्तेन वक्ष्याम्यार्थे यथातथं॥ १॥ सर्वसिद्धि

प्रदं श्रेष्ठं सर्वविघ्ननिवारणं॥ सर्वशत्रुक्षयंदिव्यं सर्वरोगहरं शुभं॥ २॥ सर्वौघसा

धकं नृणां भोगमोक्षैकसाधनं॥ प्रत्यंगदेवता चैव तत्र शृणु सम्यक् वरानने॥ ३॥ भैर

वक्ष्यास्य मंत्रस्य ऋषिघोरो ऋषिरुच्यते॥ विराट्छंदस्तथा देवो भैरवः सर्वसिद्धिदः॥ ४

भंकारं बीजमीत्युक्तं फट्कारं शक्तिरुच्यते॥ स्वेच्छासंहारसिद्ध्यर्थे विनियोगस्तथा वि

के॥ ५॥ भ्रांमीत्यादिकरंन्यासं षडंगं च तत तथा॥ कालाम्बुदश्यामलमायताक्षं करा

लमव्याहतमप्रमेयं॥ लोलालकं लोकविनाशहेतुं लुंठद्विपुंनोमिधृताट्टहासं ६

ॐनमोभगवतेउग्रभैरवायसर्वविघ्नान्नाशयस्वाहा॥२५॥चातुर्विंशतिसाहस्रंज-
पेन्मंत्रंयथाविधि॥जपतर्पणहोमानीद्विजानांभोजनस्यच॥७॥तद्दशांशक्रमेणै-
वकुर्यात्पूर्ववदंविके॥कृसरंपायसंचाज्यंअपूपंनवनीतकं॥८॥महमुद्गंचसक्तुंचकु-
र्यात्सौम्यंपृथक्पृथक्॥अष्टचूर्णंचतैलंचसर्षपंक्रूरमुच्यते॥९॥अनलभवनमध्ये
शक्तिबीजंषडर्णंहरिहरजयहंषट्साष्टकोणेससाध्यं॥वहिर[illegible]पवसुपत्रेमूलमंत्रा-
न्विवर्णान्सकलरिपुविनाशंभैरवंवैरिविज्ञं॥१०॥एतच्चक्रंतस्यपूजांजपेदष्टोत्तरं
शतं॥भैरवंवह्निकोणेचवसुकोणेग्निमादितं॥११॥भैरवीमप्यघोरंचगणेशंशिखि-

वाहनं ॥ विष्णुं च दक्षिणामूर्तिं चंडोदंडं गणेश्वरं ॥ २२ ॥ आपदुद्धारणं पश्चाद्यजेन्मंत्रीय
थाक्रमं ॥ तत्तन्मंत्रैः पृथक्पश्चान्मूलेनाप्यग्निदिङ्मुखं ॥ २३ ॥ ह्रीं भैरवी देवदत्तको
पशमनं कुरु कुरु स्वाहा ॥ ह्रीं रीं अघोरभैरवाय देवदत्तं मोहय मोहय मोहय हुं फट्
स्वाहा ॥ ॐ ह्रां गं विघ्नराजाय देवदत्तकर्मविघ्नं कुरु कुरु स्वाहा ॥ ॐ ह्रां सुं रं सुब्रह्मण्या
य वैरिध्वंसं चल प्रचल प्रस्वाहा ॥ श्रीं ह्रीं ॐ जं सुदर्शनकरापरिभुचित्तं भ्रामय भ्रा
मय स्वाहा ॥ ह्रीं जं दक्षिणामूर्तये पशुरसाध्यमेधां समुत्कर्षय स्वाहा ॥ ॐ ऊं चंडोदं
डाय शत्रुघातप्रधानय स्वाहा ॥ ॐ हुंः षः स्वं क्षं लं आपदुद्धारणाय देवदत्तचक्षुः

श्रोत्रजिह्वाघ्राणामनः ॥ प्राणाहनुसंभंकुरु लंक्षंखंयः हः स्वाहा ॥ रलांतके चित्राच्या
द्यिमातृकाः पूजयेत्क्रमात् ॥ नरांतकं महाभीमं विजयं रक्तभैरवं ॥ पश्चिमादियजेन्मो
न्नमंत्रैः पृथक् पृथक् ॥ ॐ नमो भगवते नरमगशरिराय सकलनरांतकाय रिपुशरीरं
नाशय नाशय हुं फट् स्वाहा ह्रीं नमो महाभीमभैरवाय सर्वलोकभयंकराय सर्वशत्रू
न्संहारकारणाय हुं हुं देवदत्तं ध्वंसय ध्वंसय स्वाहा ॥ वीरं हं ॐ नमो भगवते विजयभै
रवाय सर्वशत्रून्संहारकारणाय हुं हुं देवदत्तं ध्वंसय ध्वंसय स्वाहा ॥ वीरं हूं ॐ नमो भ
गवते विजयभैरवाय शत्रून्विनाशाय २ ॥ त्रिपुरिताधराय नररुधिरमांसभक्षणाय

देवदत्तमुच्चाटयोच्चाटयताडय २ संहर २ भस्मीकुरुकुरुस्वाहा ॥ ॐ ह्रीं स्फ्रं रक्तभैरवा
य नवशवकपालमालालंकृताय नवांबुदश्यामलाय एहि एहि शीघ्रं मे हि मां पाहि
ऐं ऐं ग्रा गामिकार्यं वरवद ग्रविलोपाधिं हरहरसौभाग्यं देहि मे स्वाहा ॥ भैरवं पुन
रिष्ट्वा यत्वे छामंत्रं शतं जपेत ॥ तथा तथा भवेन्न नेतद्धिनादेवं वेरिणां ॥ इत्याकाश
भैरवकल्पे चतुस्त्रिंशोध्यायः ॥ ३४ ॥ सिद्धिभैरवप्रयोगः ॥ श्रीशिव उवाच ॥ रहस्यं
वक्ष्यि ते देवि सर्वकाम्यार्थसिद्धिदं मंत्रस्यस्मरणादेव मुच्यते पातकैर्जनः १ सि
द्धिभैरवमंत्रस्य ऋषिः शंकर उच्यते संकृतिछंद इत्युक्तं देवता सिद्धभैरवः २ भं बीजं

नुततः शक्तिविनियोगस्तुमोहने॥ भ्रांह्रामित्यादिनापाशान्यासं सर्वस्य चांबिके॥३॥
ज्वलत्पटभिशिरिव्यमानोर्ध्वकेशं त्रिशिखडमरुहस्तं चंद्ररेखावतंसं॥ विमलवृषभ
रूढं चित्रशार्दूलवासं॥ विजयमनिशमीडे विक्रमोद्दंडचंडं॥४॥ ॐ नमो भगवते वि
ज्ञभैरवाय प्रलयांतकाय महाभैरवाय महाभैरवाय सर्वविघ्ननिवारणाय शक्तिधराय
चक्रपाशायेवरमूलनिषंगाय अखिलगणनायकाय आपदुद्धारणाय आकर्षय
२ आवेशय २ मोहय २ भ्रामय २ भाषय २ शीघ्रं भावय ह्रां ह्रीं त्रिपुरतांडवाय अष्ट
भैरवाय स्वाहा॥ आवेशो॥ शांतं त्रिमुखमालिख्यतेनसंवे[illegible]ष्य सर्वतः॥ अधोश्लाहिपार्श्वे

वज्रंत्रंविजयमद्भुतं ॥ ५ ॥ एतद्यंत्रंलिखित्वातद्यंत्रेणानेनमंत्रतत् ॥ भस्मदर्शनमात्रे
णाक्षणाद्दावेशमाप्नुयात् ॥ ६ ॥ त्रिभांडकंविनाशायप्रत्येकंप्रस्थषट्कं ॥ उडुत्यमागता
श्रींड्रादद्यान्मारायपक्वतिकं ॥ ७ ॥ कृत्वालंकृत्यपूर्वोक्तंस्थानदीपंप्रकल्प्यच ॥ अन्नभां
डद्वयंचापिनियवत्कन्यस्यतत्वतः ॥ ८ ॥ रक्तपुष्पोपहारैस्तानलंकृत्यविशेषतः ॥ वटिकं
सज्जयभस्मानांविपिनंसस्यरूपकं ॥ ९ ॥ स-षस्थेचशाकंचसर्वंसंमिश्रितंतथा ॥ शा
लिपिष्टमान्यसेत्पीदेचवृत्तंषट्शतंक्रमात् ॥ १० ॥ मोदकंनारिकेलंचकदलींचगुडंत
था ॥ लाजमुद्गंतिलंसक्तुंलोकसख्यंयथोचितं ॥ ११ ॥ सर्वोरापेकानिविन्यस्यकृतिकाग्र

मै॰ ८९

89

सवन्यसेत् ॥ भांडद्वयं तु तत्पार्श्वे विन्यसेत्ताभिषं शुभं ॥ १२ ॥ उलूखले समासीनं वेत्रच्छत्रो
त्तमांकं ॥ आईवासोपस्थवीत पश्चेत्तु क्रान्तु तत्स्मरणात् ॥ १३ ॥ निर्धूमं निर्ज्वलं तं चक्रि
रेदुपरि पावकं ॥ आहूय साधकान्धीरान्नलंकृत्य साभिनीयवत् ॥ १४ ॥ दत्वा तद्बलिंत
त्रित्रिवारं जप्त्वा तं मन्त्रं ॥ १६ ॥ ततस्तु ग्रामसीमान्तमाग्नेयीं कुंकुमं नयेत् ॥ संजपन्भैर
वमंत्रं दशवारं हृदैस्तथा ॥ १७ ॥ तत्र रक्तं बलिं दद्यात्ता पुनर्निर्यतः स्वयं ॥ स्नात्वा तीर्थे
थसंपृक्तान्नयेत्पुंक्तेक्षपांशानैः ॥ १८ ॥ अथ बलिगमनाद्रूलकलसुरउदतरमनघोज्ज
पेनपश्चात् ॥ परिग्रहमथवाकुगांतरं भाभ्रभ्रमत भवनेनपेत्पुरन्ते ॥ १९ ॥ तमभिनि

६

हितरीपांतत्क्षणादेव शांतं यथ भुवि धृतसर्वानन्वक्तत्वापि कुर्युः ॥ तदनुसततलभू

मिंगोमयेनानुलिप्य प्रसवकुशुमधूपैरंगवल्यादिकुर्यात् ॥२०॥ तदनुदिनमुहूर्ते भो

ज्जने होममन्त्रैर्विधिपुतमपमंत्री कारयेदत्तमेव ॥ सकलशमनवेत्काविघयापा

श्वेयावासरविरिविनिशांतांस्यात्प्रज्ञापेनासिध्येः ॥२१॥ एषरुद्रबलीनाम प्रशस्तबलि

कर्मणां ॥ नंद्यु देवासुरगणाःयक्षगंधर्वराक्षसाः ॥२२॥ सर्वभूतपिशाचाद्याःसर्वरोगा

श्चदारुणाः ॥ स्वयमेव हि संयांति होमेनापिविशेषतः ॥२३॥ अधीरोपिंडातोमंडितो

मंत्रिबलिकर्मनकारयेत् ॥ कारये घटितस्यैव कालस्निग्धोभवेच्छिवे ॥२४॥ ॐ ह्रीं

भै॰ ६०

90

श्रीं हालाहलभैरव अखिललोकभैरव आंभैरवदेव दत्तोसि त्वं तस्य साध्य वाङ्मनस्त्वक्
चक्षुःश्रोत्रजिह्वा घ्राण प्राणानाकर्षयाकर्षय तोषय २ गर्जय २ साधय २ बोधय २
नादय २ सोक्षय २ हूंः उच्चाटयोच्चाटय शीघ्रमुच्चाटय २ एह्येहि मां रक्ष मम मैतद्बलिं
भक्ष भक्ष ॐकारभैरव भक्ष २ उन्मत्तभैरव भक्ष २ नीलभैरव भक्ष २ त्वरितं भक्ष
२ ॐ ह्रां ह्रीं स्वाहा कुक्कुटस्य परं मीन मंत्रेत्वाज्जंगुडं तथा नालिकेरं श्मशाने तु रुद्र
स्य बलिमाहरेत् ॥ इत्याकाशभैरवकल्पे बलिविधिर्नाम पंचत्रिंशोध्यायः ॥ ३५
श्रीशिव उवाच ॥ ब्रह्म ऋषिश्च गायत्री छंदो दैवतमुच्यते ॥ क्षेत्रपालो भैरवश्च क्षीं

बीजं वह्निजायया ॥१॥ शक्तिः सर्वार्थसिद्ध्यर्थे विनियोगो वरानने । क्षामित्यादि करंन्या

सं ष्वंगं न्यासं च कारयेत् ॥२॥ शिरोमुखे तथा कर्णौ हृन्नाभ्याधारजानुके । पादयो

र्मंत्रवर्णान्निविन्यसेन्मंत्रवित्तमः ॥३॥ नीलांजनाद्रिनिभमूर्ध्वजपिंगकेशं वृत्ता

ग्निलोचनमुपात्तगदाकपालं । आशांबरं भुजगभूषणमुग्रदंष्ट्रं क्षेत्रेशमद्भुततनुं

प्रणमामि देवं ॥४॥ रक्तज्वालजटाधरं शशिधरं रक्तांगतेजोनिधिं हस्ते शूलकपालपा

शडमरुं लोकस्य रक्षाकरं । निर्वाणं श्वनवाहनं भुजहरं आनंदकोलाहलं । वंदे भूत

पिशाचनाथमनिशं क्षेत्रस्य पालं शिवं ॥५॥ लक्षमेकं जपेन्मंत्रं त्रुटुपातरशां शाकं

भैं. ९२

९।

च स्रगा घृत सिक्तेन ततः क्षेत्रे समर्चयेत् ॥६॥ क्षांवीजं पूर्वमुच्चार्य क्षेत्रपालानवै नमः नमः स्त्वस्तु ते रे विघ्नघ्नाक्षरमिहोच्यते ॥७॥ ब्राह्मेयमूहूर्तउत्थायपध्याय न्नाथपदांबुजं ॥ देहशुद्ध्यादिकं कृत्वा स्नानं संध्या समाप्य च ॥८॥ यागभूमिं ततो ग त्वा अर्चयेन्मंडपं पुनः क्षां क्षेत्रपालअर्चनमंत्रपा यनमः इत्याभ्यर्च्य पृथिव्यैनम इति भूमिंभ्यर्च्य ॥९॥ आसनं परिकल्प्याथ स्थित्वा तत्र छोषणादिकं ॥ मातृकांतं प्रवि

म

न्यस्य ततः संकल्प्य पूजयेत् १०॥ संवित्सेवां ततः कृत्वा कलशं पूजयेत्सुधीः शंखपूजा समारभ्य पंचाक्ष पिंडार्चनं चरेत् ११ आधार शक्तिमारभ्याद्दिग्गजांतं समर्चयेत् ॥ अष्टकु

पञ्चरत्नमभूमितस्ततः परं ॥ १२ ॥ श्वेतछत्रं चामरेच धर्मोघट्टकमेवच ॥ गुणत्रयं पंचपंचकं

दनानंपंचपञ्चकं ॥ १३ ॥ शिवधर्मकं समभ्यर्च्य ततश्छिवज्ञानमालकं ॥ वैराग्यकर्णिकां चैव

वनिष्पट्टकमतः परं ॥ १४ ॥ इच्छाज्ञानक्रियामंतं तु शैवपीठं ततोर्चयेत् ॥ षट्कोणमष्ट

दलं लिख्य चतुर्द्वारयुतं प्रिये ॥ १५ ॥ भूपुरं विलिखेद्देवि क्षेत्रपालमनुक्रमात् ॥ मूलमध्ये

तु संपूज्य षडुपचारैस्तु षोडशैः ॥ १६ ॥ षट्कोणेष्वनमभ्यर्च्य सर्वज्ञादिषडंगवत् ॥ क्षं पूर्वमनु

लिख्यायं भैरवायनमस्ततः ॥ १७ ॥ अग्निकेशं करालं च घंटारवमतः परं ॥ महाकोप

मतः पश्चात्पिशिताशनमेवच ॥ १८ ॥ पिंगलाक्षं तूर्ध्वकेशं अष्टपत्रे समर्चयेत् ॥

चतुर्द्वारसमायुक्तं चतुरस्त्रं ततोर्चयेत् १९॥ बीजं स्वबीजयुक्तं इंद्रादींशांतकयजेत्॥
भूपुरद्वयमध्येतु वज्राद्यष्टकमर्चयेत्॥२०॥ तत्रद्वारवरस्थाने तु मूलंमध्येत्रिरर्चयेत्॥
षोडशोपचर्याघसर्वंम्मूलेनपूजयेत्॥२१॥ गंधंपुष्पंपंचधूपंचदीपंनैवेद्यमेवच॥
ताम्बूलंवलिदानं क्षेत्रेशोद्वादशंक्रमात्॥२२॥ ॐ क्षांमिति २ तुष २ कुरु २ कुल २
भंजय २ नर्तय २ विश २ महाभैरवक्षेत्रपालवलिंग्रहूण गृहूण हुंफट्स्वाहा तक्षे
त्रपालसमुद्वाश्यशिवोहमितिभावयेत्॥१॥ शृणुवक्ष्यामितेदेविरहस्यंसावधानतः
गृहेग्रामांतरेचैवदेशेदेशांतरेषुच॥१॥ मंत्रीप्रवेशकालेतुशुद्धोऽशुद्धोपवाविशः

त्रिवारं प्रजपेऽनया क्षेत्रपालस्य सूक्तकं ॥२॥ जप्त्वा मंत्रं स्तु योगाच्छिद्रे हि देशे यत्र कुत्र
चित्। तत्राप्यपजयं नास्ति स्वप्नेपि वनशंसय ॥३॥ सूक्तेस्मं मंत्र्य सहस्रवारं त
त्कुंकुटांडेलवणं गोत्रु मध्ये। संस्थाप्य शाखोटे द्विमलं च रात्रौ रवने तत् श्मशाने हितमार
णाय ॥४॥ आदाय नीत्वाभिमंत्र्य मंत्री सहस्रमेकैकदिनं त्रिरात्रं। संतानदंतापह
रं समस्तदोषापहं पुष्टिकरं च वश्यं ॥५॥ अभंयाष्टकमादाय सर्वरोगप्रमारकं ॥
क्षेत्रस्य पतिना वयं हितेनेव जयामसि ॥६॥ गामभ्वं पोषयित्वा सनो मृडातीदृशे
संस्थाप्यामभ्यर्च्यो कहाद्यैर्नवपात्रे तु मन्मये ॥७॥ चौरेणापि हृतं वस्तु तरशादापये

त्स्वयं ॥ उक्तेति साध्यमाकर्षे पल्लवं तदनंतरं ॥ ८ ॥ मंत्रावशाने संयोऽस्य जपेत्सहस्रकं
सहस्रकं ॥ पंचांगं प्रजपेद्देवं पश्चिमाभिमुखं स्मशान ॥ ९ ॥ सचोरः पीडितोनेन भयं
दास्यति निश्चयं ॥ नरस्तस्यैव पुनः कुर्याज्जपेदेकाग्रमानस ॥ १० ॥ सचोरस्तद्दिनादेव
ज्वरग्रस्तो भवेद्ध्रुवं ॥ पोष्यते द्विदिनाचोरस्त्रिदिनां म्रियते ध्रुवं ॥ ११ ॥ तत्पालकं चपं
चाहात्तज्ज्ञाता हरिनात्पिता ॥ दशाहात्तस्य वंशस्य मरणं प्राप्ति सुंदरि ॥ १२ ॥ तस्मादे
वं प्रयत्नेन जपेन्मुक्तिमितिक्रमात् ॥ यस्तस्य सर्वसिद्धिः स्यात्सर्वदेशे च सर्वदा ॥ १३ ॥
इत्याकाशभैरवकल्पे • क्षेत्रपालविधिर्नाम षट्त्रिंशोध्यायः ॥ ३६ ॥ अथ व३

वानलभैरवप्रयोगः॥ शिव उवाच॥ वडवानलमंत्रस्य रहस्यं वच्मि तें विके॥ मंत्रस्मर

णमात्रेण वन्हिः रुद्रं भजते ध्रुवं॥१॥ जयेत्क्रतेऽखिलांल्लोकां दहत्येव हि निश्चयः॥ ता

दृशं तुः सहं मंत्रं सावधानमनः शृणु॥२॥ वडवानलमंत्रस्य भास्करो ऋषिरुच्यते॥

पंक्तिश्छंदस्तथा देवो भगवान्वडवानलः॥३॥ रं बीजं माकृतिः शक्तिर्विनियोगस्त्व

भीष्टके॥ रात्रित्यादि करंन्यासं षडंगं च तथांविके॥४॥ ध्यानं॥ त्रिनयनमरुणात्वाव

द्धमौलिं सुशुक्लांशुकमरुणमनेकाकल्पमंभोजसंस्थं॥ अभिमतवरशक्तिस्वस्तिका

भितिहस्तं नमत कनकमालालंकृतांशं कृशानुं॥५॥ ॐ त्वमग्ने द्युभिस्त्वमाशुशुक्ष

मै॰ ९८

९५

गिाः ॥ ऋक् ॥ पंचाष्टकोष्ठखुयथाक्रमेणवै भ्वानरंमंत्रमयोलिखित्वा ॥ रेखाग्रशू
लंचतदग्रसाध्यं ताराव्रुतंतद्‌वाग्निचक्रं ॥ ६ ॥ एतद्यंत्रंसमालिख्यलोहेताम्रेथसीस
के ॥ आवाह्यपूजयेद्वह्निं आग्नेयाभिमुखोविके ॥ ७ ॥ शत्रून्चहन्संहारायेत्वंतद्‌हंदह
सत्वरं ॥ फट्‌स्वाहेत्यग्निमंत्रस्यपल्लवंसमुदीरितं ॥ ८ ॥ सपल्लवंजपेन्नूनंमष्टोत्तर

नि

सहस्रकं ॥ तत्क्षणाद्वैरिवेश्मानिनिर्दग्धानिभवंतिहि ॥ ९ ॥ तत्पश्चादुपसंहारंकर्तव्यंश्र
वरानने ॥ उपसंहारमंत्रस्यसविताऋषिरुच्यते ॥ ११ ॥ छंदोऽत्यष्टीततोदेवोभगवान्ह
व्यवाहनः ॥ स्रकारंबीजमित्युक्तंशक्तिर्वैभ्वानरीजया ॥ १२ ॥ अनलाख्योपसंहारेविनि

योगस्ततः प्रिये ॥ पादैरर्धैः करन्यासं षडंगं न्यासकं तथा ॥ १३ ॥ सप्तराय शशाङ्कोपश

क्तिहस्ताय वन्हये ॥ कपालिने नमस्तुभ्यं मत्पापं दह मुंच तं ॥ १४ ॥ ॐ भूर्भुवः स्वः अग्नि

रस्मिज्जन्मना जातवेदाः स एकः भूर्भुवः स्वरोम पापं दह मुंच तं स्वाहा ॥ जपेदष्टोत्तरशतं

ब्राह्मणान् भोजयेत्ततः ॥ आग्नेयास्यस्य मंत्रस्य परब्रह्म ऋषिस्ततः ॥ छंदस्तु देवी गाय

त्री देवता पावकोंविके ॥ १५ ॥ ॐकारं बीजमित्युक्तं शक्तिर्व्याहृतिरुच्यते ॥ स्वेच्छासंहार

सिद्ध्यर्थे विनियोगस्ततः परं ॥ १६ ॥ सप्तास्याहुतीर्वर्णैरनुलोमविलोमकैः ॥ षड्भिरेतैः

करन्यासं षडंगं च यथाविधि ॥ १७ ॥ वागग्नकोणास्थितमेधमानं परानन्दं तं स्वमरीच

कोरौः ॥ शोणांबरं चंद्रकलावतंसं नमामि देवं वडवामुखाग्निं ॥ १८ ॥ शोचिष्केशाय वि
द्महे वैश्वानराय धीमहि तन्नः शुक्रः प्रचोदयात् ॥ त्रिकोणवन्हिबीजं वसकोणेष्वक्रमं
त्रकं ॥ १९ ॥ पादशोवाह्यकेसाध्यः प्राणायामाद्यपावकं ॥ २० ॥ मननस्तानरसासाध्यपश्चा
न्मंत्री मनुं [illegible] पजेत् ॥ मंत्रस्मरणमात्रेण वैरिणां मरणं भवेत् ॥ २१ ॥ एतद्देवं महाघोरं अ
व्याहतमनुत्तमं ॥ अतंत्रितो रिपुग्रामनिर्मोचनं तु पवर्द्धनं ॥ २२ ॥ योसकृत्त्वग्रजपेत्तस्य स
र्वं सिध्यति निश्चयः ॥ पर्वते विपिने घोरे विजने दुर्गमे तथा ॥ २३ ॥ अग्न्यागारे यावज्जपेन्मं
त्रान्नस्यनैवास्ति तद्भयं ॥ ज्वालामालानैस्तु वह्निभिर्दैत्युसंज्ञातवेदाभिवृतस्तदानिं ॥ स

वेत्र(क्षेत्र)क्षेरदृष्यसौपिपश्चात्कुर्यादिनेब्राह्मणभोजनंच॥२५॥अथाकाशभैरवकल्पे॥
वडवानलभैरवविधिर्नामसप्तत्रिंशोऽध्यायः॥३७॥दिक्पालकप्रयोगः॥श्रीशिव
उवाच॥वक्ष्यामींद्रादिदिक्पालान्महाबलपराक्रमान्॥सर्वलोकेश्वरान्वीरान्साधका
भिष्टदायकान्॥१॥मंत्रस्यलोकपालानांब्रोररुद्रइतिस्मृतः॥अनुष्टुबुष्णिक्त्रिष्टुप्
पङ्क्तिर्गायत्र्मेवच॥२॥जगतीबृहतीपङ्क्तिःक्रमाच्छंदोभिधीयते॥देवतास्त्वपरि
क्पालास्तथावीजानिशांभवि स्वस्ववाहनसंरूढान्स्वस्वायुधसमन्वितान्॥स्वस्वा
लंकारसंयुक्तान्सौम्यहंलोकनायकान्॥४॥ॐनमोभगवतेलांइंद्रायवज्रहस्ताय

सुराधिपतयेऐरावतवाहनायसशक्तिकायसपरिवारायहुंफट्स्वाहा॥१॥ॐ नमोभ
गवतेरामभगनयेतेजोधिपतयेमेखवाहनायशक्तिकायसपरिवारायहुंफट्स्वाहा
२॥ॐ नमोभगवतेहायमायदंडहस्तायप्रेताधिपतयेमहिषवाहनायसशस्वाहा॥३
ॐ नमोभगवतेषांनिर्ऋतयेखड्गहस्तायरक्षोधिपतयेनरवाहनायसश० स्वाहा॥४॥
ॐ नमोभगवतेवांवारुणायपाशहस्तायपयोधिपतयेमकरवाहनाय० स्वाहा॥५॥
ॐ नमोभगवतेयांवायवेध्वजहस्तायप्राणाधिपतयेरुरुवाहनायसश० स्वाहा
६॥ॐ नमोभगवतेसांसोमायगदाहस्तायनक्षत्राधिपतयेअश्ववाहनायसश०

स्वाहा ॥ ७ ॥ ॐ नमो भगवते श्रीईशाय त्रिशूलहस्ताय विद्याधिपतये वृषभवाहना
य शशक्तिकाय सपरिवा[illegible]राय हुं फट् स्वाहा ॥ ८ ॥ एतानि दिव्यमंत्राणि खेट मंत्राव
शानके ॥ योऽस्य मंत्री जपेदेवं प्रयोगाष्टक सिद्धये ॥ ९ ॥ आदौ बीजानि संशोध्य जपेन्मं
त्रं यथाविधि तत्रैवाष्टमहाकर्मसिद्धयः सिद्ध्यन्ति ध्रुवं ॥ ६ ॥ स्तंभनाकर्षसंहार
विद्वेषप्लावनानि च ॥ उच्चाटमोहदंडानी वासवादि शिवांतकं ॥ ७ ॥ मूलं विनाने नाद
शापतीनां मंत्रं प्रयोगे रास सपल्लवेन कुर्यान्मनीषी सततं वरेण्ये कर्म स्वशोषेभु
यथाक्रमेण ॥ ८ ॥ इत्याकाशभैरवकल्पे॰ दिक्पालविधिर्नाम अष्टत्रिंशोध्यायः ३८

॥ अथ व्याधिप्रयोगः॥ श्रीशिव उवाच॥ अथ वक्ष्यामि गुह्यं ते दारुणं व्याधिकारणं
सर्ववैरिहरं देवि सर्वजंतुविनाशनं॥१॥ अतोस्य व्याधिमंत्रस्य वीरभद्र ऋषिस्मृतः
छंदोनुष्टुप् तथा देवो महाव्याधिकरः शिवः॥२॥ व्यांकारं बीजमित्युक्तं हुं शक्तिस्त
दनंतरं॥ विनियोगो निशुंभ कुशत्रुनाशाय पीडने॥३॥ व्यामित्यादि करंन्यासं त
दंगं तदनंतरं॥ ४॥ त्रिपादं त्रिभुजं भीमं त्रिमूर्द्धानं त्रिलोचनं॥ त्रिशूलासि कपाला
सं कपाल ध्यं वक्रदंष्ट्रकं॥ सपृसंग वसा मांस भव चर्मांबरधारिणं॥४॥ अर्थैवां
गवृणोद्भूतक्रिमिजालसमाकुलं॥ व त्रनाशं वृहत्तुंदं क्षुधया पीडितो घं॥६॥

वैरीणां देहमालिख्य भक्षयेत्तं विकल्मोकषायकुसुमानीलं महाव्याधिकरं शुभं ॥ चितं ध्या

त्वा जपन्मंत्रं सहस्रं शत्रुरुग्जुषः ॥ ७ ॥ ॐ नमो भगवते रुद्राय महाव्याधिकाराय देवदे

वदत्तं पीडय स्वाहा ॥ तिर्यगूर्ध्वगा चतुर्दश रेखा मध्ये तो प्रविलिखेदथ मंत्रं ॥ वाद्यस्थल

गतरुग्रुक् साध्यं रोगचक्रक्रमिदं रिपुसाध्यं ॥ ८ ॥ यंत्रमालिख्य सीसे वा साध्यवृक्षे

वां विके ॥ आराध्य चाष्टचूर्णेन लिखित्वा जन्यापनेन्नि रिपोः ॥ ९ ॥ श्मशाने वलिपूर्वं तु पु

नस्नात्वा जपेत्तथा ॥ जपमेवमहं कुर्यात् शत्रूणां रोगवृद्धये ॥ १० ॥ अहेतुकं महारोगं

रिपुः संप्राप्य नश्यति ॥ यत्साध्यं लिख्यतं व्याधेस्तत्र द्वाधिर्भविष्यति ॥ ११ ॥ तद्रोगं

रिपुराशिस्त्वशुभगोनुभवेद्ध्रुवं ॥ इत्याकाशभैरवकल्पे व्याधिकल्पनं नाम एकोनचत्वारिंशोध्यायः ॥ ३९ ॥ अथ मृत्युप्रयोगः ॥ शिव उवाच ॥ अथ मृत्युप्रयोगस्य रहस्यं वच्मि ते विके स्मरणादस्य मंत्रस्य मृत्युरावि भवेद्ध्रुवं १ अतोस्य मृत्युमंत्रस्य ऋषिर्नारायणः स्मृतः उष्णिक्छंदस्तथा देवो मृत्युर्जीवांतकोपमः २ ङकारं बीजमीत्युक्तं हूंकारं शक्तिरीरितं नियोगे जीवसंहारे द्रामिवाहिकरांगकं ३ रक्तास्यं भीमदंष्ट्रं प्रकटितवदनं वक्रतार्धांकरार्ध्यैः शूलं पाशं कपालं घणिमुसलहलावज्रखेटं वहंतं भीभीमं कलाभ्रनीलं भ्रुकुटिननयनं सैरिभोत्कं धरूढं नानाभूतैः करालैः परिवृतमवि

लं प्राणकालं भनक्तामि ॥ ७ ॥ ॐ नमो भगवते उग्रमृत्युवेषमापदउग्राय दंडहस्ताय ह्रं ह्रैं देवदत्तं गृह्ण गृह्ण सर्वलोकं भयंकराय नाशय नाशय ह्रैं ॐ फट् स्वाहा ॥ य इदं कालमंत्रं तु निशामध्ये जपेत् पुनः ॥ जप्त्वा ततो जपेन्मंत्रं सह स्वनाम पूर्वकं ॥ तज्जपस्यावमानेनु सरिपुर्मरणं भवेत् ॥ कृते पंचापुते मंत्रे रिपोः पंचशतान्यतिः । लक्षे कृते शताद्देव हृये स्मरणात् भवेत् ॥ इत्याकाशभैरवकल्पे मृत्युविधिर्नाम चत्वारिंशोध्यायः ॥ ४० ॥ श्रीदेव्युवाच ॥ सर्वज्ञ सर्वमंत्रस्य सर्वाचार्य शिवप्रभो ॥ शरभं कवचं दिव्यं सर्वरक्षाकरं परं ॥ ७१ ॥ वज्रपंजरनामाख्यं वद मे करुणाकर ॥ श्रीशिव उवाच

वक्ष्यामि भृगुदेवेसि सर्वलक्षणमद्भुतं॥ शारभं कवचं नाम्ना चतुर्वर्गफलप्रदं॥१॥ शरभशालुवपक्षिराजाख्यकवचस्यास्य सदाशिव ऋषिः छंदो बृहती शरभेश्वरः देवता प्रणवं बीजं प्रकृतिः शक्तिरुच्यते॥ कीलकं पक्षिराजाय सर्वरक्षाकरो विभुः॥४ परप्रयोगशांत्यर्थं शर्वशत्रुनिवृत्तये॥ चतुर्वर्गार्थसिद्ध्यर्थे विनियोगस्तु भावना ५॥ ध्यानं॥ रक्ताभं सुप्रसन्नं त्रिनयनममृतोमन्त्रभाषाभिरामं॥ कारुण्यांभोधिमीशं वरदमभयदं चंद्ररेखावतंसं॥ शंखं चक्रं त्रिशूलं प्रतिहतविधिना भासमानात्मभावं सर्वेशं शालुवेशं प्रणतभयहरं पक्षिराजं नमामि॥६॥ ॐ श्रीशिवः

पुरतः पातु मा पाश्चि शस्तु पृष्ठतः॥ पिनाकी दक्षिणां पातु वामपार्श्वे महेश्वरः॥१॥ शि
खाग्रं पातु मे शंभुर्निटिलं पातु शंकरः॥ ईश्वरो वदनं पातु भ्रुवोर्मे ध्वेपरांतकः॥२॥
भ्रुवौ पातु मम स्थाणुः कपर्दी पातु लोचने॥ शर्वो मे श्रोत्रयोः पातु वागीशः पातु लं
बिकां॥३॥ नासयोर्मे वृषारूढो नासाग्रं वृषभध्वजः॥ स्मरारिः पातु मे ताल्वोरोष्ठयो
र्भक्तवत्सलः॥४॥ जिह्वां मम सदा पातु सर्वविद्याप्रदायकः॥ पातु मृत्युंजयो दंतान्
चिबुकं पातु भूतराट्॥५॥ परमेशः कपोलौ मे त्रिकं पातु कपालभृत्॥ कंठं पशुपतिः पा
तु शूली पातु हनूं मम॥६॥ स्कंधं हृदयं हरः पातु धूर्जटिः पातु मे भुजौ॥ भुजसंधिं मह

देवईशानो मे प्रकूर्परे ॥७॥ मध्यसंधौ जगन्नाथः प्रकोष्ठे चंद्रशेखरः ॥ मणिबंधौ त्रिनेत्रो मे भीमः पातु करस्थले ॥८॥ करपृष्ठे मृडः पातु रुद्रोंगुष्ठद्वयं मम ॥ उमासहायस्तर्जन्यौ भर्गो मे पातु मध्यमे ॥९॥ अनामिके करालास्यः कालकंठः कनिष्ठिके ॥ गंगाधरोंगुली पर्वं रापप्रमयो नखानि मे ॥१०॥ वक्षस्तत्पुरुषः पातु कक्षे दक्षाध्वरांतकः ॥ अघोरो हृदयं पातु वामदेवस्तनद्वयं ॥११॥ भालदृक्जठरं पातु नाभिं नाराप्रणाप्रियः कुक्षौ प्रज्ञाकरः पातु कुक्षिपार्श्वे महाबलः ॥१२॥ सद्योजातः कटीं पातु पृष्ठभागं तु भैरवः ॥ मोहनो जघनं पातु गुदं मम जितेन्द्रियः ॥१३॥ ऊर्ध्वरेता लिंगदेशं वृषणौ विश्वमोहनः

ऊरुयुग्मं भवः पातु जानुयुग्मं भवान्तकः ॥ १४ ॥ हुंकारः पातु मे जंघे फूट्कारो मम गुल्फके ॥
वषट्कारः पादपृष्ठे वौषट्कारोंघ्रितालके ॥ १५ ॥ स्वाहाकारोंगुलीः पार्श्वे स्वधाकारोंगुली
र्मम ॥ त्वरितः सर्वसंधिन्मे रोमकूपान्नृसिंहजित् ॥ १६ ॥ त्वचं पातु मनोवेगः कालजि
द्रुधिरं मम ॥ पुष्टिदः पातु मे मांसं मेदो मे स्वस्तिदोऽवतु ॥ १७ ॥ सर्वो मास्थिचयं पातु मज्जां म
मज्जगात्मभुः ॥ शुक्रं वृद्धिकरः पातु बुद्धिं वाचामधीश्वरः ॥ १८ ॥ मूलाधारं त्वजः पातु भग
वान्स्वारभेश्वरः ॥ स्वाधिष्ठानमजः पातु मणिपूरं हरिप्रियः ॥ १९ ॥ अनाहतं सानुवेशो
विशुद्धं जीवनायकः ॥ सर्वज्ञानप्रदो ह्याज्ञां ललाटं मे सदाशिवः ॥ २० ॥ ब्रह्मरंध्रं महादेवः

भैं०
२१
10

पक्षिराजोऽखिलात्मवान्॥ सर्वरोगवशीकारः पातु मां पश्चिमेऽजित्॥२१॥ वज्रमुष्टिवरा भीतिहस्तः कालाभ्रसंन्निभः॥ विजयासहितः पातु चैं ह्रीं कक्कुभमग्निजित्॥२२॥ शान्तिः शूलकपालासिहस्तः सौदामनीप्रभः॥ जयायुतो महाभीमः पातु वैश्वानरीं दिशं॥२३॥ दंडासिशूलमुसलपाशांकुशकरांबुजः॥ यमांतकोऽजितायुक्तो याम्यां पातु दिशं मम॥२४॥ खड्गखेटासिपरशुहस्तः शत्रुविमर्दनः॥ अपराजितयायुक्तः सदाव्यान्नैरृतीं दिशं॥२५॥ पाशांकुशाधनुर्बाणपाणिर्घोणियुतो ग्रहः॥ हरिद्राभो निशं पायाद्वारुणीं दिशमात्मजित्॥२६॥ ध्वजायत्रकचोदारमभ्रेजो दुर्गायुतः खगः ध्वज

वज्रयुतोदारिभञ्जोदुर्गायुतोगिलः॥चंडुवेगःशिवःपायात्सततंमाहेंद्रिंदिशं॥२७॥ग
दाक्षस्वग्वराभीतिकरांभोजश्रियायुतः॥कनकाभोमहातेजाःपातुकौवेरिकिंदिशं
२८॥त्रिशूलाहिकपालाग्निदोस्तदोविद्ययायुतः॥भस्मोद्धूलितसर्वाङ्गःऐंशींपा
त्वपराजितः॥२९॥जयाक्षकृपुस्तकाभोजकमंडलुकरांवुजः॥ऊर्ध्वंपातुगिरायुक्तः
सर्वभूतहितेरतः॥३०॥शंखचक्रगदाभीतिहस्तःपद्मायुतोव्ययः॥कालांजनसमो
नीलःपातालंपात्वनारतं॥३१॥ऋगुक्ताविदिशःपातुसानुवोनारसिंहजित॥शरभः
पातुसंग्रामेयुद्धेवैरिकुलांतकः॥३२॥सर्वसौभाग्यदःपातुजाग्रत्स्वप्नसुषुप्तिषु॥स

वैसंपत्प्रदः पातु धनधान्यादिकं मम ॥३३॥ संतानदः सुतान्पातु दारान्नापुरुषोनिशं
वंधून्वृद्धिकरः पातु गृहं सर्ववशंकरः ॥३४॥ ग्रामं ग्रामेश्वरः पातु राज्यं पातु दिगंबरः
राष्ट्रं शांतिकरः पातु राज्ञानं धर्मशासकः ॥३५॥ मार्गे दुष्टहरः पातु धर्मकर्माणि भैरवः
वटुकः पातु मे सर्वं अवस्थासु भयेषु च ॥३६॥ स्पर्शो वीक्षणासंयुक्तः प्राणारक्षमनोज
वः ॥ प्रधानमूर्तिभावश्च प्राशारेप्यात्मसिद्धिकृत ॥३७॥ साधकः प्रणवं बीजं नमो भ
गवतेति च ॥ प्रतिनामचतुर्थ्यंतं स्पर्शोऽत्यभिधीयते ॥३८॥ द्विज्वलप्रज्वलेत्साध्यं साध
य द्विद्विरक्षतत् ॥ सर्वदुष्टेभ्यो हुं फट्स्वाहांतं युक्त दीक्षणं ॥३९॥ स्पर्शान्यस्य न जयं ह्य

प्रतीष्यानंसमाहिताः ॥ प्रार्थये देखिलं सैवं हृदिस्थं लालुवेश्वरं ॥ ४० ॥ ये ग्रामघातकाः
क्रूराः कपटी दौष्टिकाभटाः ॥ तस्कराः शात्रवः क्रुद्धा वधे शक्ताः पलाशनाः ॥ ४१ ॥ छद्म
चारा विटाश्च ष्टा दिवाचरनिशाचराः ॥ ते सर्वे पक्षिराजस्य पक्षवातपराहताः ॥ ४२ ॥ स्त्री
बालसहिताः क्षिप्रं पतितमातृकुलान्विताः ॥ भग्नचितागतस्थाना पांसुदेशांतरस्थ
यं ॥ ४३ ॥ ये चतुष्ग्रहा रक्षः पिशाचादेवयोनयः ॥ चतुःषष्टिगणाः सप्तसप्त तुन्मादका
ग्रहाः ॥ ४४ ॥ अष्टाशीतिमहाभूताः सप्तकोटिमहाग्रहाः ॥ नवतीज्वरभेदाश्च शतभेदाश्च
क्रतिकाः ॥ ४५ ॥ पंचशाकूराणा थाश्चनियुतं कृत्रिमाग्रहाः ॥ प्रेताः रूदाः स्त्रयस्त्रिंशत्पिंडादा

नपरायणाः॥४६॥ श्रुतं क्षुद्रभेदाश्च चत्वारिंशच्छिवाह्वयाः॥ द्वात्रिंशद्वह्निवक्त्राश्च
त्रिंशन्मार्जारवक्त्रकाः॥४७॥ चतुःषष्ट्या खुरूपाश्च ये चान्ये क्षुद्रयोनयः॥ ते सर्वे शा
लुवेशस्य शंखनिश्वनमोहिताः॥४८॥ विषमाः स्खलिताः भ्रांताः प्राणत्राणपरायणाः
गच्छंतु संप्रयोक्तारो रे शांतरमनिच्छया॥४९॥ ये च भूषिकवैडालाः शुनकोरगवृश्चि
काः आशीविषाः शिवा व्याला व्याघ्रऋक्षेभशरकराः॥५०॥ गृद्धाः श्येनाः खगाः कंकाः दं
शकाः मशकाः मृगाः॥ एते शरभहस्ताग्रनखक्षतविमोक्षगाः॥५१॥ सवह्नि कच्छटा सिक्ता
शिलातलनिपिंडिताः॥ संभिन्नतनवः श्रीघ्रं नश्यंत्वखिलदुश्वराः॥५२॥ नदसंतूरगाः

क्वापि नातिवातो पि वीज्ञतु ॥ नरहत्वमहीवन्हिरापांत्वा पोनवाधिका ॥ ५३ ॥ नवर्षंत्वति

वृष्टिश्चनपतवृशानिः क्व चित् ॥ नाक्रामत्वपमृत्युश्चनास्तुत्यातः कदाचन ॥ ५४ ॥ न

भ्रिपंत्वंभमित्ज्ञनानभवंत्वशुभं क्व चित् ॥ नवदंत्वसहं वाक्यं जंतवो मम देशके ॥ ५५

नास्तुवैरं तु जंतूनामन्योन्यं राजके मम ॥ भवंतु सु[illegible]नः सर्वे सर्वाः संतु पतिव्रताः ॥ ५६

सर्वास्सूयंतु सत्पुत्रान्सुश्रीश्च शुभलक्षणाः ॥ सर्वे देवाश्च नंदंतु संतु कल्याणकारकाः

५७ ॥ राजन्वती मही चास्तु राजा भवतु धार्मिकः ॥ संस्रवंतु पयो गावः फलं त्वोषधयो

धिकं ॥ ५८ ॥ भवंतु फलदा वृक्षाः सिद्धिर्भवतु मे खिलं ॥ ममास्तु तरसा नूनमात्मज्ञान

खि ४

मचंचलं ॥ ५९ ॥ कामक्रोधमहालोभसंमोहमदमत्सराः ॥ नश्यंतु क्वापि मे सर्वे भग
वन्करुणानिधे ॥ ६० ॥ शरभेश्वर विश्वेश पक्षिराज दयानिधे ॥ देहि मे ह्यचलां भक्तिं
प्रणतोस्मि पुनः पुनः ॥ ६१ ॥ गौरीवल्लभ कामारे कालकूटविषादन ॥ मामुद्धराप
दंभोधेस्त्रिपुरघ्नांतकांतकं ॥ ६२ ॥ साम्बुवेश जगन्नाथ सर्वभूतहिते रतः ॥ पाहि मां
तरसा घोरान् दुष्टान्नाशय नाशय ॥ ६३ ॥ कालभैरव विश्वेश विश्वरक्षापरायण
रक्ष मूखकचोरेभ्यो धान्यराशिमिमं प्रभो ॥ ६४ ॥ पक्षिराज महादेव प्रणतार्तिविनाश
न ॥ मदीयानि पदार्थानि नित्यं पालय पालय ॥ ६५ ॥ सर्वज्ञ सर्वलोकेश सर्वदुष्टवि

नाशन॥ तस्करेण हृतं वस्तु द्रुतं स्थापयस्थापय॥ ६६॥ ये मर्मवारिनः क्षुद्राः छिद्रोपद्रव
कारकाः॥ सर्वाचारपरिभ्रष्टा मानहीनाश्च रोधकाः॥ ६७॥ ते सर्वे शालुवेशस्य मुसला
ग्रघचूर्णिताः॥ नश्यंतु निमिषार्द्धेन पावकाद्वन्नतूलवत्॥ ६८॥ ये ज्ञानाद्रोहिणो भ्रा
ष्टास्तत्कालोचितभाषिणः॥ सत्कर्मविघ्नकर्तारः शांतभर्त्सापरापराः॥ ६९॥ ते शा
लुवेशहस्ताग्रखड्गनिर्भिन्नदेहिनः॥ पतंतु भूतले पाम्यं प्राणास्तेषां प्रयांत्वरं॥ ७०॥
त्वदंघ्रिध्याननिर्दग्धपापकोशास मंत्रिणो॥ मह्यं द्रुह्यति ये तेषां विभवान्निक्षपंत्वरं॥ ७१
त्वदाचारपरं भक्तं साधकं मां विवेकिनं॥ पश्वाक्रामंति संग्रामे तेन गच्छंतु पराहताः॥ ७२॥

शै०
९५
105

त्वदीयनैवमार्गेणसंचरंतंजपातुरं॥ येवदंतिपरीवादंभ्रांताःश्रीघ्रंभवंतुते॥७३॥त्व
दासममलंधीरंयेमांतन्नेषितुंवलात्॥ मनसापेनमन्यंतेतत्त्वांतभ्रमनुक्षणात्॥
७४॥मनसाकर्मणावाचायेकुर्वंत्यतिदुःसहं॥ तेमहाशोकरोगाब्धौपतंत्वाभुशिवा
ज्ञया॥७५॥मदीयानीपदार्थानिगृहीतुंयोवलोकते॥तत्क्षणादेवनष्टाक्षोभवत्वा
शुशिवाज्ञया॥७६॥ मदीयंद्रव्यमादाययेगच्छंतितस्कराः॥ सिंहारिपाशसंबद्धा
स्तेचरंतुप्रदक्षिणं॥७७॥स्रीमातीताश्चयेचौराग्रहीतद्रव्यसंचयाः॥ अवशावयवा
स्तेतुआगच्छंतुशिवाज्ञया॥ ७८॥तस्करानिम्नगामीताःस्वांन्नधान्यधनाधिकाः॥

पक्षिराजां कुशाः क्रुद्धाः समागच्छंतु मद्गृहं ॥ ७९ ॥ समाहृत्य परार्थं यद्देशातीताश्च तस्कराः ॥ शरभेश हल्लाक्रुद्धास्तु आगच्छंतु वेद्रुतं ॥ ८० ॥ चोरा गृहीतु मुद्युक्ताः समागच्छंति मद्गृहे ॥ तेसां तु वेशपक्षोत्थ वा तैर्गच्छंतु सत्वरं ॥ ८१ ॥ शांतं विविक्तानं भक्तं त्वदंघ्रिध्यानतत्परं ॥ ब्रुवंति ये प्राणास्ते प्रयांतु यमीं पुरीं ॥ ८२ ॥ षट्त्रिंशत्कोष्ठके यंत्रे रेखाशृलायसाध्यके ॥ स्वेच्छामंत्रं लिखित्वा तु जपेदाराध्य साधक ॥ ८३ ॥ मध्ये पाशांकुशौ वन्हिसाध्यनामम लिखेत्क्रमात् ॥ उदङ्मुखः सहस्रं तु रक्षणाय जपेन्निशि ॥ ८४ ॥ नष्टाहरणके पंचरात्रं पश्चिमदिङ्मुखः ॥ मारणे सप्तरात्रं तु दक्षिणाभिमुखो जपेत् ॥ ८५ ॥

...ता: ५

शै॰
१०६

106

रोगनिग्रहश्चैव चाष्टराज्ञमार्गेनेपद्दिङ्मुखः ॥ इति गुह्यं महामंत्रं परमं सर्वसिद्धिदं ॥ ८६
शरभेशाख्यकवचं चतुर्वर्गफलप्रदं ॥ यत्नाहं प्रतिपक्षं वा प्रतिमासमथापि वा ॥
८७ ॥ योजपेत्प्रतिवर्षं वा वरेण्यः स शिवो भवेत् ॥ एवं हि जपतः पुंसः पातकं चोपपा
तकं ॥ ८८ ॥ तत्सर्वं लयमाप्नोति रविणा तिमिरं यथा ॥ दशावृत्त्या जपेन्नित्यं प्रा
तरुत्थाय साधकः ॥ सर्वसिद्धिं समाप्नित्यं देहांते स शिवो भवेत् ॥ ८९ ॥ त्रिकालं
ध्यानपूर्वं तु जपेद्द्वादशवार्षिकं ॥ कार्येनानेन सोऽहं विज्ञो जीवन्मुक्तो भवेन्नरः ॥ ९० ॥
दशवारं जपेन्नित्यं मंडलं यो वरानने सोऽणिमादिगुणान्प्राप्य विचरेत्खेचरया सदा

अतलादिधरणपादिभुवनानी चतुर्दश॥ विचरेत्कामतः सर्वैः पूज्यमानो यथासु
खं॥ ९२॥ त्रिमासं योजपेन्नित्यमष्टोत्तरसहस्रकं॥ सहस्राशारमेशास्य सारूप्यं
लभतेविके॥ ९३॥ षण्मासं योजपेद्देवि प्रयतस्तु दृढव्रतः॥ मद्रूपधारको मर्त्यः
सर्वसिद्धिप्रदायकः॥ ९४॥ ममलोके च संपूज्यो विष्णुलोके विशेषतः॥ ब्रह्मलो
के च रमते सर्वत्र न निवार्यते॥ ९५॥ इन्द्राग्नियमरक्षेशानलेशपवनैः सह॥ सो
मेशैः सह रुद्रैश्च दिशांपालैः सपूज्यते॥ ९६॥ आदित्यसोमपृथ्वीजबुधश्री
गुरुभार्गवैः पूज्यते सग्रहैः सर्वैः शनिराहुः सकेतुभिः॥ ९७॥ अगवंगिरः पुलस्त्ये

श्च पुलहात्रिमरीचिभिः ॥ दक्षकश्यप भृग्वाद्यैर्योगिभिश्च स पूज्यते ॥ ९८ ॥ भैरवै
र्वसुभी रुद्रैरादित्यैर्वालखिल्यकैः ॥ दिग्गजैश्च महानागैर्दिक्पालैर्दिव्यवाहनैः
९९ ॥ माहेश्वरैर्मेखलारत्नैः कामधेनुं सुरद्रुमैः ॥ सरिद्भिः सागरैः शैलैर्दैवताभिस्त
पोधनैः ॥ १०० ॥ दानवै राक्षसैः क्रूरैः सिद्धगंधर्वकिन्नरैः ॥ यक्षविद्याधरैर्नागैर
प्सरोभिश्च पूज्यते ॥ १०१ ॥ अपस्मारग्रहैर्भीमैरुन्मत्तैर्ब्रह्मराक्षसैः ॥ वेतालैः खेच
रैर्मत्यैः कूष्मांडराक्षसैर्ग्रहैः ॥ १०२ ॥ ज्वलावक्त्रैस्तमोहारैः स्त्रीग्रहैः पावकग्रहैः
भूतप्रेतपिशाचाद्यैर्ग्रहैः सर्वैः स पूज्यते ॥ १०३ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर

न्यैश्च ज्ञातिभिः ॥ पशुपक्षैर्मृगव्यालैः पूज्यते सर्वजंतुभिः ॥ ४ ॥ किमत्र बहुना

देवि तत्त्वं वक्ष्ये यथातथं ॥ मया च विष्णुना चैव विश्वकर्ता च कल्प्यते ॥ १०५ ॥ भव

त्या च गिरा लक्ष्म्या ब्रह्माणाद्याष्टमातृभिः ॥ गणेशाद्यैश्वरादि योगींद्रैर्योगिनीभिः

सपाल्यते ॥ १०६ ॥ यद्दद्यं प्रजपेद्भक्त्या तस्या साध्यं न विद्यते ॥ कवचेन्द्रं महामंत्रं

जपेत्तस्माद्दनुत्तमं ॥ १०७ ॥ उच्चारणेन मरुद्धक्रो विद्वेषे राक्षसाननः प्रागाननो

भीष्टसिद्ध्यो सर्वे ष्वीशाननदिङ्मुखः ॥ १०८ ॥ यो जपेत्कवचं नित्यं त्रिकालध्यान

पूर्वकं ॥ सर्वसिद्धिमवाप्नोति सहसा साधकोत्तमः ॥ १०९ श्रीदेव्युवाच ॥ देवदेव म

हादेव शिवकारुण्य वारिधे ॥ पाहि मां शरणार्तं त्वामित्यसौ रसततं मम ॥ ११० ॥ सर्वा
र्थसाधनोपायसर्वैश्वर्यप्रदायकः ॥ समस्तापत्प्रतीकार चंद्रशेखर ते नमः ॥ १११ ॥
यत्कृत्यं तेन्न कृत्यं तन्न कृत्यं परकृत्यं ॥ त्वदाचरितं उभयोः प्रायश्चित्तं शिवतव
नामाक्षरद्वयोच्चरितं ॥ ११२ ॥ इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे॰ शरभ
कवचंनामैकचत्वारिंशोध्यायः ॥ ४१ ॥ श्रीशिव उवाच ॥ अथ वक्ष्ये वयं देवि
कामराजं महामनुं ॥ तस्य स्मरणमात्रेण मुह्यंत्यखिलजंतवः ॥ १ ॥ विशेष
तोखिला देवा यक्षकिन्नरराक्षसाः ॥ गणा गणाः पिशाचाश्च भूत प्रेतादयो

विके॥ २॥ श्रीकामराजमंत्रस्य संमोहन ऋषिस्मृतः॥ ततश्छंदस्तु गायत्रीमन्मथो दे

वताश्रयं॥ ३॥ क्लंकारबीजमोंकारः॥ शक्तियोगस्तु मोहने॥ क्लामित्यादिकरन्यासं षडं

गंव्रततस्तथा॥ ४॥ अरुणामरुणावासो माल्य दामांगरागं स्वकरकलितपाशं साकुशा

ब्जेक्षुचापं॥ मणिमयमुकुटाद्यैस्सन्नमाकल्पजातैररुणनिलसंस्थैश्चिंतये देवयोनिं

५॥ कामदेवाय विद्महे पुष्पबाणाय धीमहि तन्नोनंगः प्रचोदयात्॥ महामंत्रमिदं

दिव्यं तुभ्यं न समुदीरितं॥ चतुर्विंशतिसाहस्रं जपेन्मंत्रं दृढव्रतः॥ ६॥ ततः सिद्धमवा

प्नोति साधकं द्रोखिलं शिवे॥ आलेख्यं कर्णिकायामनङ्गपुटपुटे मारबीजं समस्ता

मै॰ ९९

109

ध्यं॥ तदूर्ध्वे ष्वंगाषट्कं बहिरष्टगुणाशोमारणायपत्रिवर्गोन्॥ मालामंत्रं दलाग्रेष्वप
गृहमुखशः पार्थिवाभ्रिष्वनंगं॥ कुर्यो घंत्रं तदेतत्भुवनमपिवशे काकथामा
नुषेषु॥ ८॥ क्लींकारं पूर्वमुच्चार्य कामदेवाय तत्परं॥ रतिवल्लभाय सर्वजनसंमो
हनाय च॥ ९॥ ज्वलज्वल प्रज्वलेति स्यात्सर्वजनदृष्टिं च॥ तत्पश्चान्मुखहृदयं
पश्चान्ममवशंकुरु॥ १०॥ कुरु स्वाहेति मंत्र एकोनपंचाशदक्षरः॥ विविधेषु प्रयो
गेषु साध्यनामसुपल्लवं॥ ११॥ एतद्घंत्रं समालिख्य जपेत्स्वेष्टार्थसिद्धये॥ वह्नेर्गे
हपुरांतरस्थमदनं मायां लिखेद्वाग्भवं षट्कोणेष्वथ संधिषु प्रविलिखेत् क्लूंकार

मावेष्टयेत् ॥ स्त्रीबीजेन समीरितं त्रिभुवनक्षोभाकरं श्रीप्रदं यंत्रं पंचमनोभवात्म
कमिदं सौदर्यसंपत्प्रदं ॥ १२ ॥ यंत्रमेतद्धरं श्रेष्ठं सर्वसौभाग्यदायकं ॥ तस्य धारण
मात्रेण सर्वलोकजयं लभेत् ॥ १३ ॥ एकारौकारयुक्ता हरिहरिजहरा पंचबाणा
स्मरस्य ॥ ख्याता लक्ष्म्याप्यमीषां हृदयकुचदृशोर्मूर्द्धि गुह्यक्रमेण ॥ मर्मस्वेते
प्रभूयो निजनयनधनुः प्रेरितैस्तैश्चतुर्भिः स्पंदंते सुंदरीणां मदनपरवशाद्वह्नि
वल्काद्यथाज्यं ॥ १४ ॥ हृदयं कमलं चैव स्तनौ चूतस्तथैव च ॥ नेत्रमं शोकपुष्पं च शि
रसे मल्लिकास्तथा ॥ १५ ॥ योनिर्नीलोत्पलं चैव इत्येते पंचबाणयोः ॥ कामेकाक्षरवि

ध्यात्वा त्रैलोक्यक्षोभकारणं ॥१६॥ लक्षत्रयं जपेन्मंत्री मधुरत्रयसंयुतैः ॥ फुल्लैः किंशुक
जैः पुष्पैर्जुहुयात्तद्दशांशकं ॥१७॥ आधारशक्तिमारभ्य पीठमंत्रांतमंबिके ॥ मोहिनी
क्षोभिणी चैव त्रासिनी जंभिणी तथा ॥१८॥ आकर्षणी द्राविणी च ह्लादिनी च ततः
परं ॥ क्लिन्ना च क्लेदिनी प्रोक्ता पीठशक्तयः प्रकीर्तिताः ॥१९॥ ॐ नमो भगवते जगन्मो
हनरूपाय कामपीठाय नमः ॥ इष्टुं गावरणं पूर्वं मध्ये दिक्ष्वर्चयेच्छरान् ॥ शोषणं मो
हनं चैव संदीपनमतः परं ॥२०॥ संतापनोन्मादनं च पंच वीयुतं क्रमात् ॥ प्रणामबाणा
हस्ता ज्ञा ध्येयास्ता बाणदेवता ॥२१॥ संपूज्याङ्गं तन्मध्ये तु शक्तयो पोशे यथाक्रमं ॥ प्र

थमानंगरूपा च द्वितीयानंगमन्मथा ॥२२॥ अनंगकुसुमानंगसुकुमारा च पंचमी
अनंगशिशिरानंगमेखलानंगदीपिका ॥२३॥ लीलामौलधारीण्यो रक्तेरक्ताः
सुभूषिताः ॥ बहिः षोडशपत्रेषु पूज्या षोडश शक्तयः ॥२४॥ युवती विप्रलंभाख्या ज्यो
त्स्नासु भूसदृइवा ॥ सुरतागुहली लोल्पा कांतिः सौदामिनी पुनः ॥२५॥ काम छत्रा चंद्र
लेखा सुकीर्त्याख्या मदनातुरः ॥ योनिर्भाया वती तास्तुः कल्हार विलसत्कराः ॥२६॥
स्मेरवक्त्रा युवतयो मदविभ्रममंथराः ॥ दलाग्रेषु पुनः पूज्यास्मरस्य परिवारकाः ॥२७
शोको मोहो विलासश्च नमो विभ्रमो मदनातुरः ॥ अपत्रयोषवा कामी चूतपुष्पो रति

प्रियः ॥२८॥ श्रीमत्सप्तपंतउज्ञोन्योहे मंत्रशिखिरोमरुः ॥ इक्षुकार्मुकपुष्पेषुधारास
क्ताःसुभूषिताः ॥२९॥ अपरा अंगनांगस्थावनितासक्तमानसाः ॥ रतिप्रियानष्टहृद्
भुपजेद्दृष्टौ विशिष्टधीः ॥३०॥ परभृत्सारसौ पश्चाच्छुकमेकाश्वयोपुनः ॥ अनंग
भूविलासौ ह्वौ भाषावौ - प्रकीर्त्तितौ ॥३१॥ चतुरस्रस्यकोणेषु पूज्यास्तत्परिचारकाः
माधवीमावृतीपश्चाद्हरणीक्ष्मामदोत्कटा ॥३२॥ सितचामरधारिण्यः सर्वाभरण
भूषिताः ॥ बाह्यलोकेश्वरान्पश्चात्तदस्त्राण्यर्चयेत्ततः ॥३३॥ इत्थंयोभजते देवं सुगं
धकुसुमादिभिः ॥ सभवेल्लब्धसौभाग्योलक्ष्म्यादितधरेश्वरः ॥३४॥ नेत्रघ्राणा

मुखेषुपाणिपदयोऽसाग्रेषुसंधिष्वथोमूलाधारसलिंगनाभ्युदरहृत्पार्श्वोपरां

गस्तने॥ कर्णोमत्रिकवाक्श्रोत्ररसनाघ्राणाक्षिकर्णोलिके एतान्विन्यस्यानु

क्रमेणादशधावाणान्जगन्मोहनान्॥३५॥ इत्याकाशभैरवकल्पे० मन्मथप्रयो

गोनाममहीचत्वारिं॥ वक्ष्यामिरक्तचामुंडामहासिद्धिप्रदायिनीं॥ निग्रहानुग्रहाक

र्षेदक्षामद्भुतमोहिनी॥१॥ मंत्रस्यारक्तचामुंडाया ऋषिःशंकरईरितः॥ छंदोनुष्टुप्

तथारक्तचामुंडादेवतांबिके॥२॥ लक्ष्मीबीजंततःशक्तिर्महामायेष्टसिद्धये॥ वि

नियोगः करांगन्यासंताभ्यांयथाविधि॥३॥ एक्रोंभांबीतवक्त्रास्मितमुखकम

लामिंदुरेखावतंसां ॥ ह्रि ऐं मणिक्यमुक्तामणिगणखचितैर्भूषणौर्दिव्यमा

नां ॥ पुष्पेष्वेष्वासवाणानरिजलजभुजां फुल्लपद्मायताक्षीं ॥ चामुंडां सद्गुन्न

मुंडीं रिकुलमथनां शंकरीं भावयामि ॥ ४ ॥ लक्ष्मीमायां समुच्चार्य वर्जितापक

रं ततः ॥ रक्तचामुंडीं भ्री -- शत्रुजीवविनाशिनी ॥ ५ ॥ एह्येहि च ततः शीघ्रमिष्टा

नाकर्षयाथ तुः ॥ आकर्षय ततः स्वाहा चतुस्त्रिंशल्लिपिक्रमात् ॥ ६ ॥ वृतं च सप्त

छद्मरूपत्रैततः परं सप्तदशाक्षकं च ॥ मध्ये ह्रिं बीजं क्रमशा रक्तमंत्रं दलेषु साध्यं

परतो ह्रीं बीजं ॥ ७ ॥ एतत्तु रक्तचामुंडामंत्र माकर्षमोहयोः ॥ महावीर्यमयत्नात्सि

पवश्यकरं परं ॥ ८ ॥ आकर्षे सर्वजंतूनां वनितानां विशेषतः ॥ चतुस्त्रिंशसहस्रेण मं
त्रसिद्धिर्जपेन तु ॥ ९ ॥ तर्पणं च तथा कुर्यादंते भौमदिने विके ॥ मध्यान्हे च बलिं द
त्वा मातृकोष्टे तु साधकः ॥ १० ॥ तद्वारि वस्त्रसूत्राग्रपलालात्प्रग्रमध्यतः ॥ बंधनेन
न तु मंत्रेणाव ध्वान्मस्योपरि स्थले ॥ ११ ॥ निराहारा द्विजान्भृत्वा संपूज्यैव चतुष्टया
न् ॥ तस्मिन्कोष्टे स्पृशन्न्हेतुं निशायां वामांगवात्परं ॥ १२ ॥ सहस्रं प्रजपेद्देवि दृढचित्तो
निमीलितः ॥ ततो देवी समागत्य हठात्कारासिताधमा ॥ १३ ॥ आहूय स भवानत्र
किमर्थं वद सत्वरं ॥ इति ब्रूयात्ततो मंत्री निर्भयस्तिष्टति पुमः ॥ १४ ॥ त्वपिकार्यं समा

सेचेत्पुत्कागृहेतिततस्ततः ॥ दघात्सासकलंहेतुंसाचांगीकृत्यतंप्रति ॥ १५ ॥ तुष्टाहंतु
किमिष्टंतेवरंसत्यंददामितत् ॥ इतिवक्ष्येततोमंत्रीगुरुसन्निधमन्वहं ॥ १६ ॥ समा
दानानुदानंचमोहाकर्षवशानिमे ॥ श्रुत्वादेवीततःसर्वंतथैवाहंकरोमिच ॥ १७ ॥
देहिमेचबलिंहेतुंप्रतिसंततिमित्यथो । तथाभवतुचामुंडेसततंत्वंप्रसीदमे ॥ १८
इतिदृष्ट्वाततोदेवीदत्वावरकरांबुजं ॥ अंगुलीपंचग्रह्णीयात्तस्यहस्ताब्जसंस्थि
तो ॥ १९ ॥ ततःस्वेच्छाक्रियांकुर्यान्नित्यालंकृतविग्रहः ॥ इत्याकाशभैरवकल्पे० चा
मुंडाविधिर्नामत्रिचत्वारिंशोध्यायः ॥ ४३ ॥ मोहिनीप्रयोगं मंत्रस्यमोहिनीदेव्याऋ

षिरिशानउच्यते॥ छंदस्तु जगतीदेवीमोहिनीदेवताविके॥ १॥ ऐंबीजं ह्रीमथोशक्ति
मस्तंक्लीलकंततः॥ विनियोगस्तुलोकानांचित्तसंमोहनेतथा॥ २॥ ऐंकारसहितैर्मो
याभेदवैर्ग्लौंःषडंगकम्॥ भुवनवित्रयदक्षाप्रथवाल्गोष्ठचापाजगतिविविधरूपं
दर्शयंतीजनानां॥ तरूपानरणिग्रोभाशानवाग्रोवशानाजयतिनिखिललो
कज्ञीविनीमोहिनीयं॥ ३॥ बीजंशक्तिसमुच्चायकीलकंस्ततःपरं॥ ॐनमोभ
गवतिमहामोहिन्यतःपरं॥ ४॥ महामायेततःपश्चात्सर्वलोकवसंकरि॥ देवदत्त
स्यवाकचक्षुश्चित्तंमोहयमोहय॥ ५॥ नानारूपाकृतिंशीघ्रंपश्चाद्दर्शयदर्शय॥

ह्रीं स्वाहेति महामंत्रं पंचाशद्वर्णात्मकम् ॥ प्रजपेत्पंचसाहस्रं सिद्ध्येतर्वशांतथा ॥६॥
पंचकोणे लिखित्वांतं न्मध्यबीजेन वेष्टयेत् ॥ पंचकोणे लिखेच्छक्तिं वा ह्येसाध्यं सम
न्मथं ॥ देवदत्तमुखे यंत्रे दर्शो येन्निजं पेन्मनुं ॥ जंगमाजंगमानां च देवभूतादिरा
क्षसां ॥८॥ पुरतो विविधं रूपं दर्शनं विस्मयं भवेत् ॥ कौतूहलं महामंत्रं स्वेच्छ दर्शन
सिद्धिदं ॥९॥ सर्वसंमोहनं श्रेष्ठं साध्यमे [illegible] देरदर्शनम् ॥ सर्वलोकवशीकारं सर्ववि
द्वेषकारणं ॥१०॥ सर्वशत्रुजयं दिव्यं सर्वाकर्षणसिद्धिदं ॥ शतवारं जपेन्नित्यं योवि
के सावधानतः ॥ सर्वलोकजयं तस्य लभते नात्र संशयः ॥११॥ इत्याकाशभैरवतंत्रे

मोहिनीविधिर्नामचतुश्चत्वारिंशोध्यायः॥४४॥ अथ द्राविणीप्रयोगः॥ श्रीवटुकउवाच॥ मंत्रस्य द्राविणीदिव्या ब्रह्मणो ऋषिरुच्यते॥ बृहती छंद इत्युक्तो द्राविणीदेवता ततः॥१॥ ह्रींकारं बीजमित्युक्तं स्वाहा शक्तिरतः परं॥ स्वेच्छाद्रावकसिध्यर्थे विनियोगो वरानने॥२॥ ह्रामित्यादिषडंगं स्यात्करन्यासपुरःसरं॥ चंद्रार्द्धचूडां शतपत्रनेत्रां शराशपुष्पेषु कराननराणां॥ दृगास्य चित्तश्रवणां डलक्ष्म्यां श्रीद्राविणीं नौमि सुधार्द्रवाणीं॥३॥ ॐ प्रथममनुच्चार्य ह्रांनमो भगवत्यै च॥ जगन्मोहिनि तत्पश्चात्सोमेश्वरि ततः परं॥४॥ सर्वलोकाक्षिलक्ष्यश्रोत्रद्रावयद्वितयं द्विठः प्रोक्ताणा

नांचतुस्त्रिंशद्डाकिनीमंत्रमव्ययं ॥ ५ ॥ जपेदक्षरसाहस्रंतर्पणाहुतिभोजनात् ॥ तद्
शांशक्रमेणैवकुर्यात्सर्वसमर्पकं ॥ ६ ॥ शिविस्त्रस्तुमणिकीणांषोडशारंक्रमेणाश्र
तिगृहमथमंत्रेवर्णमेकंलिखित्वा ॥ बहिरपिवृतसाध्यंकामराजंचबंद्इंसकल
मनुजचित्तद्रावकंयंत्रमेतत् ॥ ७ ॥ वदनेहृदयेगुह्येदर्शयित्वाप्ययंत्रकं ॥ त्रिवारंप्र
जपेन्मंत्रंद्रावकायवरानने ॥ ८ ॥ नराश्चविविधायोगामहामोहवशावशाः ख
पमेवसदासेविक्षिप्तंतद्वशमाप्नुयात् ॥ ९ ॥ इत्याकाशभैरवेकल्पे॰ड्डाकिनीप्र॰ पंच
चत्वारिंशोध्यायः ॥ ४५ ॥ शब्दाकर्षिणीप्रयोगः ॥ श्रीशिवउवाच ॥ शब्दाकर्षिणी

